निविड़ं ४ निरन्तरं ५ सान्द्रं ६ नीरन्ध्रं ७ बहलं ८ दृढ़ं ९ गाढ़ं १० । इति हेमचन्द्रः ॥
अविरोधः, पुं, (न विरोधः । नञ्तत्पुरुषः ।) विरोधाभावः । यथा,—
"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता" ॥
इति श्राद्धतत्त्वधृतजावालवचनं ॥ अपि च ।
"अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन पूजाकर्म्म करोम्यहं" ॥
इत्याह्निकतत्त्वं ॥
अविलम्बनं, क्ली, (न विलम्बनम् । नञ्तत्पुरुषः ।) शीघ्रं । अविलम्बितं । इति रायमुकुटः ॥
अविलम्बितं, क्ली, (वि + लबि + क्त । ततो नञ्तत्पुरुषः ।) विलम्बाभावः । तत्पर्य्यायः । शीघ्रं २ त्वरितं ३ लघु ४ क्षिप्रं ५ अरं ६ द्रुतं ७ सत्वरं ८ चपलं ९ तूर्णं १० आशु ११ । इत्यमरः ॥
अविलम्बितः, त्रि, (न विलम्बितः । नञ्समासः ।) त्वरायुक्तः । तत्पर्य्यायः । उत्कटः २ । इत्यमरः ॥ अवलम्बितं ३ । यथा,—
"अविलम्बितमुत्कटं केऽप्याडम्बरवलम्बितं" ।
इति जटाधरः ॥
अविला, स्त्री, (अव + इलच् ।) मेषी । भेड़ी । इति हेमचन्द्रः ॥ (नास्ति विलं यत्रेत्यर्थे, त्रि ॥)
अविवादः, पुं, (न विवादः । नञ्तत्पुरुषः ।) विवादाभावः । यथा,—
"यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः ।
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः" ॥
इति मानवे ८ अध्याये ९२ श्लोकः ॥
अविवादी, [न्] त्रि, (न विवादी । नञ्तत्पुरुषः ।) विवादरहितः । निर्व्विवादी । नञ्पूर्व्वविवादशब्दादिन्प्रत्ययेन निष्पन्नः ॥
अविवाहितः, पुं, स्त्री, (न विवाहितः । नञ्तत्पुरुषः ।) अनूढ़ः । अकृतोद्वाहः । अकृतोपयमः । अपरिणीतः । अकृतपाणिग्रहः । आइवड़ इति भाषा । नञ्पूर्व्वविवाहशब्दादितप्रत्ययेन निष्पन्नः ॥
अविवाह्या, स्त्री, (न विवाह्या । नञ्तत्पुरुषः ।) विवाहानर्हा । यथा । सुमन्तुः । "मातृपितृसम्बद्धा आसप्तमादविवाह्याः कन्या भवन्ति" । आपञ्चमादन्येषां मतं । नारदोऽपि ।
"आसप्तमात् पञ्चमाच्च बन्धुभ्यः पितृमातृतः ।
अविवाह्या सगोत्रा च समानप्रवरा तथा ॥
सप्तमे पञ्चमे वापि येषां वैवाहिकी क्रिया ।
ते च सन्तानिनः सर्व्वे पतिताः शूद्रतां गताः" ॥ ॥
सर्व्वाः पितृपत्न्यो मातरस्तद्भ्रातरो मातुलास्तद्दुहितरो भगिन्यस्तदपत्यानि भागिनेयानि ताश्चाविवाह्याः अन्यथा सङ्करकारिण्यस्तथाध्यापयितुरेतदेवेति । ताश्च यथा । पितृपितामहादीनां सप्तानां सन्ततिः सप्तमीपर्य्यन्ता नोद्वाह्या । एवं पितृबन्धुप्रभृतिसम्बन्धघटकानां सप्तानां सन्ततिः सप्तमीपर्य्यन्ता नोद्वाह्या । एवं मातामहप्रमातामहादीनां पञ्चानां सन्ततिः पञ्चमीपर्य्यन्ता नोद्वाह्या । एवं मातृबन्धुप्रभृतिसम्बन्धघटकानां पञ्चानां सन्ततिः पञ्चमीपर्य्यन्ता नोद्वाह्या । बन्धुतम्माचोरसत्वेऽपि पितृमातामहमातृमातामहप्रभृत्युपरितनानां पञ्चानां त्रयाणां सप्तमीपञ्चमीपर्य्यन्ता नोद्वाह्येति । एवञ्च पितुर्म्मातुश्च मातामहकन्यान्तरसत्वे तामादाय सप्तमीपञ्चमीपर्य्यन्तायाः परीहारः । एवं बन्ध्वन्तरेऽप्यूह्यं । बन्ध्वपेक्षया त्रिगोत्रगणनं परतः सर्व्वत्र । पूर्व्वतस्तु पितुर्म्मातुश्च मातुलपुत्ररूपबन्धोरपि स्वापेक्षया अन्येषां बन्धूनां मातामहगोत्रापेक्षया त्रिगोत्रगणनं सर्व्वसामञ्जस्यं स्यात् । अन्यथा पितुः पितामहदौहित्रीकन्यायाः पितामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् परताया विवाहः प्रसज्येत स चायुक्तः । पितृगोत्रापेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात् । एवं पितुः प्रमातामहदौहित्रीकन्यायाः पितामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् परताया विवाहः प्रसज्येत स चायुक्तः । पितामहीभ्रातृपुत्रबन्ध्वपेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात् । एवं मातुः प्रपितामहदौहित्रीकन्याया मातामहभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् परताया विवाहः प्रसज्येत स चायुक्तः । वरस्य मातामहापेक्षया तस्यास्त्रिगोत्रमध्यवर्त्तित्वात् । एवं मातुः प्रमातामहदौहित्रीकन्याया मातामहीभगिनीपुत्रबन्ध्वपेक्षया त्रिगोत्रात् परताया विवाहः प्रसज्येत स चायुक्तः । मातामहीभ्रातृपुत्रबन्ध्वपेक्षया तस्या स्त्रिगोत्रमध्यवर्त्तित्वात् । इति । एवं मातृसपत्नीभ्रातृसन्ततिः पितृमातृसगोत्रादयोऽप्यविवाह्याः ॥ ० ॥ असवर्णाया अविवाह्यत्वं यथा । कलौ त्वसवर्णाया अविवाह्यत्वमाह वृहन्नारदीयं ।
"समुद्रयात्रास्वीकारः कमण्डलुविधारणं ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा" ॥
इत्यादि । इत्युद्वाहतत्त्वं ॥
अविवेकः, पुं, (न विवेकः । नञ्तत्पुरुषः । नास्ति विवेको यस्य इति समासे वाच्यलिङ्गः ।) सदसद्विवेचनाराहित्यं । यथा । 'देहात्मनोरविवेकादस्यैवं शोको भवतीति तद्विवेकप्रदर्शनार्थं श्रीभगवानुवाच अशोच्यानित्यादि" । इति श्रीभगवद्गीता २ अध्यायस्य ११ श्लोकटीका ॥ तद्वति त्रि ॥ अविमृश्यकारी । यथा,—("सहसा विदधीत न क्रियामविवेकः परमापदाम्पदम्" ॥ इति किरातार्ज्जुनीये ॥ सदसद्विवेकरहितः । यथा,— "उत्तमोत्तममप्राप्यमविवेकोऽभिवाञ्छसि" । इति विष्णुपुराणं ।)
अविवेकी, [न्] त्रि, (न विवेकी । नञ्तत्पुरुषः ।) विवेकशून्यः । अविवेचकः । यथा । "तस्माद्विवेकिनः सुखमात्रलिप्सवो नात्राधिकारिणः") इति मुक्तिवादस्य गादाधरी टीका । अपि च ।
"अस्मिन् प्रसन्ने देवेन्द्रे परमं धाम लभ्यते ।
मयाविवेकिना तस्य हृदये जनिता व्यथा ॥
सर्व्वपापहरो विष्णुः स मया व्यथितः हतः" ।
इति पाद्मे क्रियायोगसारे ११ अध्यायः ॥
अविवेचकः, त्रि, (न विवेचकः । नञ्तत्पुरुषः ।) विवेचनारहितः । अविवेकी । न विवेचकः अविवेचकः इति नञ्समासनिष्पन्नः ॥
अविशेषः, त्रि, (न विशेषः । नञ्तत्पुरुषः ।) विशेषरहितः । अभेदः । तुल्यः । विशेषाभावे, पुं ॥ विशेषाभावः । यथा,—
"पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवं ।
अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत्" ॥
इति श्राद्धतत्त्वं ॥ ("सांख्यादिमतसिद्धानि तन्मात्राख्यानि सूक्ष्मभूतानि, तानि च इदमेतदेवं गुणकमिति व्यावृत्ततया नानुभूयन्ते इत्यविशेषाः सूक्ष्माश्चोच्यन्ते" । तथा च विष्णुपुराणे,—
"तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता ।
न शान्ता नापि घोरास्ते न मूढ़ाश्चाविशेषिणः" ॥
इति ।)
अविश्रान्तः, त्रि, विश्रामरहितः । विश्रान्तिशून्यः । अनवरते, क्ली । विपूर्व्वश्रमधातोः क्तप्रत्ययान्तं नञ्समासनिष्पन्नः ॥ ("अविश्रान्तं पतद्गुंणगणकथाम्रेड़नजड़ा" ॥ इति आनन्दलहर्य्याम् ।)
अविश्रामं, क्ली, (नास्ति विश्रामो यस्मिन् इति ।) विश्रामराहित्यं । यथा,—
"अविश्रामं वहेत् भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात्" ॥
इति चाणक्यं ॥
अविश्वस्तः, त्रि, (न विश्वस्तः । नञ्तत्पुरुषः ।) विश्वासानर्हः । अकृतविश्वासः । प्रत्ययायोग्यः । यथा,—
"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासात् भयमुत्पन्नं मूलान्यपि निकृन्तति" ॥
इति चाणक्यं ॥
("विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम्" ।
इति भारते ॥)
अविश्वासा, स्त्री, (नास्ति विश्वासो यस्याम् सा ।) चिरप्रसूता गौः । केलेनगाइ इति भाषा । इति शब्दचन्द्रिका ॥
अविषः, पुं, (अव + टिषच् ।) समुद्रः । इति व्याकरणोणादिवृत्तिः । (राजा । पृथिवी । स्वर्गः । रक्षकमात्रे त्रि ।) विषशून्ये त्रि ॥ (यथा,— "इत्येता अविषा व्याख्याताः" ॥ इति सुश्रुते ॥)
अविषा, स्त्री, (नास्ति विषं यस्याम् ।) निर्व्विषाख्यं । इति राजनिर्घण्टः ॥
अविषी, स्त्री, (अविष + ङीप् ।) नदी । इत्युणादिवृत्तावुज्ज्वलदत्तः ॥
अविसोढ़ं, क्ली, (अवेर्दुग्धम् । अवि + सोढ़च् ।) मेषदुग्धं । इति हेमचन्द्रः ॥
अविस्पष्टं, क्ली, (वि + स्पश + क्त । ततो नञ्समासः ।) अस्पष्टवाक्यं । तत्पर्य्यायः । क्लिष्टं २ । इत्यमरः ॥
("नाविस्पष्टमधियीत न शूद्रजनसन्निधौ" ॥
इति मनुः ॥ अस्फुटः । यथा,—
"विरुद्धिं कम्पस्य प्रथयतितरां साध्वसवशादविस्पष्टां दृष्टिं तिरयति पुनर्वाष्पसलिलैः" ॥
इति रत्नावल्याम् ॥)